Reg. No. : ....................................

Name : ..........................................

**SY-18**

**SECOND YEAR HIGHER SECONDARY EXAMINATION, MARCH 2022**

Part – III

**SANSKRIT SAHITYA**

**(Optional)**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

***निर्देशा :***

- 15 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

***നിർദ്ദേശങ്ങൾ :***

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

## विभागः – I

**(क) 1-6 प्रश्नेषु चतुर्णाम् उत्तराणि कोष्ठकात् चित्वा लिखत ।** **4 × 1 = 4**

**1-6 ചോദ്യങ്ങളിൽ നാലെണ്ണത്തിന് ബ്രാക്കറ്റിൽ നിന്നും ഉത്തരം എഴുതുക.**

1. नारायणीयस्य कर्ता कः ?

   (मेल्पुत्तूर् नारायणभट्टः, कालिदासः, श्रीहर्षः)

2. 'अहं शौरिः न' – अत्र शौरिः कः ?

   (बलरामः, अर्जुनः, श्रीकृष्णः)

3. आनन्दलाञ्छनः इति प्रसिद्धः कविः कः ?

   (भारविः, श्रीहर्षः, माघः)

4. "सर्वविद्यासु निष्णातोऽहम्" कस्य वचनमिदम् ?

   (श्वेतकेतोः, उद्दालकस्य, कुचेलस्य)

5. शूद्रकेण विरचितं नाटकं किम् ?

   (स्वप्नवासवदत्तम्, मृच्छकटिकम्, ऊरुभङ्गम्)

6. नवभारतस्य कर्ता कः ?

   (पि. सि. देवस्या, एन् गोपालपिल्ला, मुतुकुलं श्रीधरः)

**(ख) 7-10 प्रश्नेषु चतुर्णाम् उत्तराणि पेटिकात् चित्वा लिखत ।** **4 × 1 = 4**

**7-10 ചോദ്യങ്ങളിൽ നാലു ചോദ്യങ്ങൾക്ക് പേടികയിൽ നിന്ന് ഉത്തരമെഴുതുക.**

| |
|---|
| गीताञ्जलिः |
| कादम्बर्यात् |
| आनन्दवर्धनस्य |
| कालिदासः |

7. टागोर् महाशयेन विरचितं नोबल् पुरस्कारेण सम्मानितं काव्यं किम् ?
8. कविकुलगुरुः कः ?
9. प्रथम समागमः इति पाठभागं कस्मात् उद्धृतं भवति ?
10. काव्यस्यात्मा ध्वनिः – कस्य मतम् ?

## विभागः – II

**(क) 11-15 प्रश्नेषु त्रयाणां उत्तराणि लिखत ।** **3 × 2 = 6**

**11-15 ചോദ്യങ്ങളിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

11. विग्रहवाक्यं लिखत ।

    (क) प्रशमी ।

    (ख) गृहाश्रमी ।

12. उदाहरणानुसारं पदच्छेदं लिखत ।

    (क) उदा. : पुनरस्ति → पुनः + अस्ति ।

    पुनरपत्यम् → _____ + _____ ।

    (ख) उदा. : रामोऽयम् → रामः + अयम् ।

    फल्गुनोऽयम् → _____ + _____ ।

13. प्रदत्तं वाक्यं पठित्वा क्त्वान्तल्यबन्त अव्ययपदौ चित्वा लिखत ।

    शिष्यं दृष्ट्वा प्रीतमानसः सः गुरुः तं युवकं मुहुर्मुहुः अनुगृह्य पितुस्सकाशं प्राहिणोत् ।

14. सन्धत्त ।

    (क) एतत् + तु → ________ ।

    (ख) बुद्धिः + भवति → ________ ।

15. एकपदं लिखत ।

    (क) सितानि गात्राणि येषां ते ।

    (ख) अस्माकम् इदम् ।

**(ख) 16-18 प्रश्नेषु द्वयोः उत्तरं लिखत ।** **2 × 2 = 4**

**16-18 ചോദ്യങ്ങളിൽ രണ്ടെണ്ണത്തിന് ഉത്തമെഴുതുക.**

16. कः प्रतिगणे नान्तर्भवति ।

    क. गीताञ्जलिः, अभिज्ञानशाकुन्तलं, कर्णभारम् ।

    ख. उदयति, प्रसरति, भवती ।

17. रिक्तस्थानं पेटिकातः पूरयत ।

| |
|---|
| पतितां नभस्तः । |
| वरतन्तुशिष्यः । |
| जगदेकनाथः । |

(क) जगाद भूयो ________ ।

(ख) कौत्सः प्रपेदे ________ ।

18. पदच्छेदं लिखत ।

(क) आचार्योऽयं → _______ + _______ ।

(ख) पद्धतिरियं → _______ + _______ ।

**विभागः – III**

**(क) 19-23 प्रश्नेषु त्रयाणाम् उत्तराणि लिखत ।** **3 × 4 = 12**

**19-23 ചോദ്യങ്ങളിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

19. अधः प्रदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।

समानशीलापि तदीयवल्लभा
तथैव नो चित्तजयं समेयुषी ।
कदाचिदूचे बत वृत्तिलब्धये
रमापतिः किं न सखा निषेण्यते ।।

समानशीलापि _______ तथा एव चित्तजयं न _______ बत ! कदाचित् _______ सखा _______ किं न निषेण्यते इति ऊचे ।

20. अधः प्रदत्तं श्लोकं पठित्वा कृष्णस्य शासनमधिकृत्य एकां टीकां लिखत ।

विहितभुवनभद्रे वासुभद्रे धरित्री –
भरहरणविनिद्रे भूरिकारुण्यसान्द्रे ।
न परमखिललोकाः द्वारवत्यां जगत्या –
मुदधिवलयवत्यां हृष्टपुष्टाः बभूवुः ।।

21. यथोचितं योजयत ।

| | |
|---|---|
| शिशुपालवधम् | श्रीहर्षः |
| किरातार्जुनीयम् | कालिदासः |
| नैषधम् | माघः |
| रघुवंशम् | भारविः |

22. अधोरेखाङ्कितपदानां समानार्थकपदानि पेटिकातः चित्वा लिखत ।

अवदत्
निशम्य
चरितम्
कथितवान्

उपगम्य गुरुकुलं सः कुमारः अतीतं सर्वं वृत्तान्तं गुरुम् अश्रावयत् । श्रुत्वा च स्मयमानः गुरुः एवम् अवोचत् ।

23. सम्भाषणं मलयालभाषया अनुवदत ।

चारुदत्तः – अये मैत्रेयः सखे, स्वागतम् उपविशतु ।

विदूषकः – यद, आज्ञापयति भवान् (उपविश्य)

चारुदत्तः – भवतः हस्ते किम् अस्ति ?

विदूषकः – मम हस्ते चूर्णवृद्धेन प्रेषितम् उत्तरीयम् भवति ।

**(ख) 24-25 प्रश्नेषु एकस्य उत्तरं लिखत ।** **1 × 4 = 4**

**24-25 ചോദ്യങ്ങളിൽ ഒരെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

24. श्लोकं पठित्वा आशयं लिखत ।

यत्र विनिर्भयमुदयति हृदयं
यत्रोदात्तो मूर्धोदेति ।
यत्र प्रसरति परितो ज्ञानं
परमं स्वातन्त्र्यं विदधानम् ।।

25. सूचनामधिकृत्य पुण्डरीकस्य जन्मवृत्तान्तमधिकृत्य टिप्पणीं लिखत ।

(**सूचना** : महामुनिः, श्वेतकेतुः, मन्दाकिनीगमनं लक्ष्मीदर्शनं, मानसः कुमारः)

## विभागः – IV

**(क) 26-29 प्रश्नेषु त्रयाणाम् उत्तराणि लिखत ।** **3 × 6 = 18**

**26-29 ചോദ്യങ്ങളിൽ മൂന്നെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

26. अधः प्रदत्तं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

    यदि ह्ययाचिष्यमदास्यदच्युतो
    वदामि भार्यां किमिति व्रजन्नसौ ।
    त्वदुक्तिलीलास्मितमग्नधीः पुनः
    क्रमादपश्यन्मणिदीप्रमालयम् ।।

    (क) अच्युतः कः ?
    (ख) व्रजन्नसौ – पदच्छेदं लिखत ।
    (ग) क्रमादपश्यत् – किम् ?
    (घ) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

27. प्रदत्तं श्लोकं पठित्वा आस्वादनटीकां लिखत ।

    काव्याभिव्यक्तौ गुणसौष्ठवे च
    बृहत्त्रयी काव्यललामभूता ।।
    भाषानवद्या ललिता च हृद्या
    स्वरस्य माधुर्यमिहास्ति दृश्यम् ।।

    (**सूचनाः –** आमुखम्, आशयम्, आस्वादनम्)

28. कथास्तम्भं क्रमीकुरुत ।

    (1) उपगम्य गुरुकुलं स कुमारः अतीतं सर्वं वृत्तान्तम् अश्रावयत् ।
    (2) गुरुः अजद्वयम् अदात् ।
    (3) गुरुदक्षिणां दत्वा राजधानीं प्रतिन्यवर्तत ।
    (4) कौतुकेन हेतुना अजानां गणनां कृतवान् ।
    (5) लोकज्ञस्य मनः शास्त्रनिपुणस्य महीपतेः मुखं म्लानम् अभवत् ।
    (6) यदा अजानां संख्या सहस्राधिकम् उपेष्यति तदा प्रत्यागच्छतु ।

29. स्वभावनिरूपणं कुरुत ।

    "चारुदत्तः"

    (**सूचनाः –** मृच्छकटिकम्, नायकः, दारिद्र्यदुःखम् अनुभूयमानः)

**(ख) 30-32 प्रश्नेषु द्वयोः उत्तराणि लिखत ।** **2 × 6 = 12**

**30-32 ചോദ്യങ്ങളിൽ രണ്ടെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

30. अधः प्रदत्तं गद्यभागं पठित्वा संगृह्य लिखत ।

दृश्यं श्रव्यमिति काव्यं द्विविधम् । महाकाव्यं श्रव्यकाव्ये अन्तर्भवति । सर्गबन्धं महाकाव्यं साहित्यशास्त्रे न विरलम् । किन्तु पञ्चमहाकाव्यानि इति नाम्ना कानिचन काव्यानि प्रथितानि ।

पञ्चमहाकाव्येषु कालिदासस्य रघुवंशं कुमारसम्भवमिति द्वे काव्ये, माघस्य शिशुपालवधं, भारवेः किरातार्जुनीयं, श्रीहर्षस्य नैषधीयचरितं च अन्तर्भवन्ति ।

रघुवंशनामके महाकाव्ये दिलीपादारभ्य अग्निवर्णपर्यन्तानां एकोनत्रिंशत् नृपाणां वर्णनं वर्तते । कुमारसम्भवे पार्वतीपरमेश्वरयोः प्रणयः विवाहः कुमारस्य जननम् इत्यादि विषयाणां समग्रपठनं वर्तते । शिशुपालवधमिति काव्ये महाभारतस्य सभापर्वात् स्वीकृता कथा वर्तते । शिशुपालवधं माघम् इति नाम्ना अपि अभिधीयते । तस्मिन् श्रीकृष्णेन कृतं रुग्मिण्याः अपहरणं, चेदिराजस्य शिशुपालस्य वधम् इत्यादयाः विषयाः वर्णिताः । किरातार्जुनीयनामके महाकाव्ये पाशुपतास्त्रार्थम् अर्जुनेन कृतः तपः तथा तं तपं परीक्षितुम् आगतस्य किरातवेषधारिणः शिवस्य वर्णना एवं तयो मध्ये जातं युद्धम् इत्यादीनां वर्णनं भवति । नैषधीयचरिते निषाधराजस्य नलस्य तथा भीमपुत्र्याः दमयन्त्याः प्रणयः च वर्ण्यते ।

31. अधः प्रदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

काव्यं दृश्यं श्रव्यं मिश्रं चेति त्रिधा विभक्तुं शक्यते । गद्यसाहित्यस्य उदाहरणं भवति कादम्बरी । महाकविः बाणभट्टः एव अस्य कर्ता । "कादम्बरीरसज्ञाने आहारोऽपि न रोचते' इति प्रथा प्रसिद्धमेव । संश्लिष्टपदानाम् आधिक्येन काव्यमिदं पण्डितानां सुग्राह्यम् अभवत् । साधारणजनानामपि कादम्बरीपठनाय योग्यया रीत्या ललितया भाषया च पण्डितवर्येण अनन्ताचार्येण पुनराख्यानं कृत्वा चन्द्रापीडचरितम् इति नाम्ना समाकलितम् । अत्र नायिका भवति महाश्वेता ।

(1) काव्यविभागाः के ?

(2) गद्यसाहित्यस्य एकं उदाहरणं लिखत ।

(3) कादम्बर्याः कर्ता कः ?

(4) कादम्बर्यामधिकृत्य प्रसिद्धोक्तिः लिखत ।

(5) कादम्बर्याः पुनराख्यानस्य नाम किम् ?

(6) कादम्बर्याः नायिका का ?

32. सूचनानुसारं ध्वनिपद्धतिमधिकृत्य टिप्पणीं लिखत ।

(**सूचना** : आनन्दवर्धनः, ध्वन्यालोकः, काव्यस्यात्मा ध्वनिः)

**विभागः – V**

**33-35 प्रश्नेषु द्वयोः प्रश्नयोः उत्तरं लिखत ।** **2 × 8 = 16**

**33-35 ചോദ്യങ്ങളിൽ രണ്ടെണ്ണത്തിന് ഉത്തരമെഴുതുക.**

33. सूचनानुसारं सन्तानगोपालकथा संगृह्य लिखत ।

(**सूचना** : द्वारकायां सन्तुष्टाः जनाः, ब्राह्मणस्य अष्टपुत्राणां नष्टम्, अर्जुनस्य प्रतिज्ञा, नवमपुत्रस्य अदर्शनं, कृष्णेन सह वैकण्ठदर्शनं, पुत्राणाम् आनयनम्)

34. बृहत्त्रयीमधिकृत्य सूचनानुसारम् उपन्यासं लिखत ।

(**सूचना** : पञ्चमहाकाव्यानि, घण्डामाघः छत्रभारविः, नैषधं विद्वदौषधम्)

35. सूचनानुसारं कविं काव्यं च अधिकृत्य उपन्यासं लिखत ।

(**सूचना** : मुतुकुलं श्रीधरः, आलप्पुषजिल्लायां मुतुकुलं देशे जन्म, नवभारतम्, आफ्रिकादेशे महात्मागान्धिनः संघटनाप्रवर्तनस्य चरितवर्णनं, स्वातन्त्रयसंग्रामवर्णनम्)